# શ્રી શિવમહિમ્નઃ સ્તોત્ર
## શ્રી પુષ્પદન્ત ઉવાચ

ૐ મમ્નિઃ પારં તે પરમવિદુષો પદ્યસર્દશી
સ્તુતિર્બ્રહ્માદીનામપિ તદવસન્નાસ્ત્વયિ ગિરઃ ।
અથાવાચ્યઃ સર્વઃ સ્વમતિપરિણામાવધિ ગૃણન્
મમાપ્યેષ સ્તોત્રે હર નિરવાદઃ પરિકરઃ ।। ૧ ।।

અતીતઃ પન્થાનં તવ ચ મહિમા વઙ્મનસયોર્
અતદ્વ્યાવૃત્યા યં ચકિતમભિધત્તે શ્રુતિરપિ ।
સ કસ્ય સ્તોતવ્યઃ કતિવિધગુણઃ કસ્ય વિષયઃ
પદે ત્વર્વાચીને પતતિ ન મનઃ કસ્ય ન વચઃ ।। ૨ ।।

મધુસ્ફીતા વાચઃ પરમમમૃતં નિર્મિતવતસ્
તવ બ્રહ્મન્ કિં વાગપિ સુરગુરોર્વિસ્મયપદમ્ ।
મમ ત્વેતાં વાણીં ગુણકથનપુણ્યેન ભવતઃ
પુનામીત્યર્થેઽસ્મિન્ પુરમથન બુદ્ધિર્વવસિતા ।। ૩ ।।

તવૈશ્વર્યઁ યત્તજ્જગદુદયરક્ષાપ્રલયકૃત્
ત્રયીવસ્તુવ્યસ્તં તિસૃષુ ગુણભિન્નાસુ તનુષુ ।
અભવ્યાનામસ્મિન્ વરદ રમણીયામરમણીં
વિહન્તું વ્યાક્રોશીં વિદધત ઇહૈકે જડધિયઃ ।। ૪ ।।

કિમીહઃ કિં કાયઃ સ ખલુ કિમુપાયસ્ત્રિભુવનં
કિમાધારો ધાતા સૃજતિ કિમુપાદન ઇતિ ચ ।
અતર્ક્યૈશ્વર્યે ત્વય્યનવસરદુઃસ્થો હતધિયઃ
કુતર્કોઽયૈ કાશ્ચિન્ મુખરયતિ મોહાય જગતઃ ।। ૫ ।।

અજન્માનો લોકાઃ કિમવયવન્તોઽપિ જગતામ્
અધિષ્ઠાતારં કિં ભવવિધિરનાદૃત્ય ભવતિ ।
અનીશો વા કુયાદ્ ભુવનજનને કઃ પરિકરો
યતો મન્દાસ્ત્વાં પ્રત્યમરવર સંશેરત ઇમે ।। ૬ ।।

ત્રયી સાંખ્યં યોગઃ પશુપતિમતં વૈષ્ણવમિતિ
પ્રભિન્ને પ્રસ્થાને પરમિદમદઃ પથ્યમિતિ ચ ।

PORTLAND PANDIT

રુચિનાં વૈચિત્ર્યાદ્દ ઋજુકુટિલનાનાપથજુષાં
નૃણામેકો ગમ્યસ્ત્વમસિ પયસામર્ણવ ઇવ ॥ ૭ ॥

મહોક્ષઃ ખટ્વાંગં પરશુરજિનં ભસ્મ ફણિનઃ
કપાલં ચેતીયત્ તવ વરદ તન્ત્રોપકરણમ્ ।
સુરસ્તાં તામૃદ્ધિં દધતિ તુ ભવદ્ભ્રૂપ્રણિહિતાં
ન હિ સ્વાત્મારામં વિષયમૃગતૃષ્ણા ભ્રમયતિ ॥ ૮ ॥

ધ્રુવં કશ્ચિત્સર્વં સકલમપરસ્ત્વધ્રુવમિદં
પરો ધ્રૌવ્યાધ્રૌવ્યે જગતિ ગદતિ વ્યસ્તવિષયે ।
સમસ્તેઽપ્યેતસ્મિન્ પુરમથન તૈર્વિસ્મિત ઇવ
સ્તુવન્ જિહ્રેમિ ત્વાં ન ખલુ નનુ ધૃષ્ટા મુખરતા ॥ ૯ ॥

તવૈશ્ચર્યં યત્નાદ્ યદુપરિ વિરંચિર્હરિરધઃ
પરિચ્છેતું યાતાવનલમનલસ્કંધવપુષઃ ।
તતો ભક્તિશ્રદ્ધાભરગુરુગૃણદ્ભ્યાં ગિરિશ યત્
સ્વયં તસ્થે તાભ્યાં તવ કિમનુવૃત્તિર્ન ફલતિ ॥ ૧૦ ॥

અયત્નાદાપાદ્ય ત્રિભુવનમવૈરવ્યતિકરં
દશાસ્યો યદ્બાહૂનભૃત રણકણ્ડૂ પરવશાન્ ।
શિરઃપદ્મશ્રેણી રચિતચરણામ્ભોરુહબલેઃ
સ્થિરાયાસ્ત્વદ્ભક્તેસ્ત્રિપુરહર વિસ્ફૂર્જિતમિદમ્ ॥ ૧૧ ॥

અમુષ્ય ત્વત્સેવામસમધિગતસારં ભુજવનં
બલાત્કૈલાસેઽપિ ત્વદધિવસતૌ વિક્રમયતઃ ।
અલભ્યા પાતાલેઽપ્યલસચલિતાંગુષ્ઠશિરસિ
પ્રતિષ્ઠા ત્વય્યાસીદ્ ધ્રુવમુપચિતો મુહ્યતિ ખલઃ ॥ ૧૨ ॥

યદૃદ્ધિં સુત્રામ્ણો વરદ પરમોચ્ચૈરપિ સતીમ્
અધશ્ચક્રે બાણઃ પરિજનવિધેયત્રિભુવનઃ ।
ન તચ્ચિત્રં તસ્મિન્ વરિવસિતરિ ત્વચ્ચરણયોર્
ન કસ્યાપ્યુન્નત્યૈ ભવતિ શિરસસ્ત્વય્યવનતિઃ ॥ ૧૩ ॥

અકાણ્ડબ્રહ્માણ્ડ ક્ષયચકિતદેવાસુરકૃપા
વિધેયસ્યાસીદ્યસ્ત્રિનયન વિષં સંહૃતવતઃ ।
સ કલ્માષઃ કણ્ઠે તવ ન કુરુતે ન શ્રિયમહો

PORTLAND PANDIT

વિકારોઽપિ શ્લાઘ્યો ભુવનભયભંગવ્યસનિનઃ ॥ ૧૪ ॥

અસિદ્ધાર્થા નૈવ ક્વચિદપિ સદેવાસુરનરે
નિવર્તન્તે નિત્યં જગતિ જયિનો યસ્ય વિશિખાઃ ।
સ પશ્યન્નીશ ત્વામ્ ઇતરસુરસાધારણમભૂત્
સ્મરઃ સ્મર્તવ્યાત્મા ન હિ વશિષુ પથ્યઃ પરિભવઃ ॥ ૧૫ ॥

મહી પદાઘાતાદ્ વ્રજતિ સહસા સંશયપદં
પદં વિષ્ણોર્ભ્રામ્યદ્ ભુજપરિઘરુગ્ણ ગ્રહગણમ્ ।
મુહુર્દ્યૌર્દૌઃસ્થ્યં યાત્યનિભૃતજટાતાડિતતટા
જગદ્રક્ષાયૈ ત્વં નટસિ નનુ વામૈવ વિભુતા ॥ ૧૬ ॥

વિયદ્વ્યાપી તારાગણગુણિતફેનોદ્ગમરુચિઃ
પ્રવાહો વારાં યઃ પૃષતાલઘુદૃષ્ટઃ શિરસિ તે ।
જગદ્દ્વીપાકારં જલધઇવલયં તેન કૃતમિ
ત્યાનેનૈવોન્નેયં ધૃતમહિમ દિવ્યં તવ વપુઃ ॥ ૧૭ ॥

રથઃ ક્ષોણી યન્તા શતધૃતિરગેન્દ્રો ધનુરથો
રથાંગે ચન્દ્રાર્કૌ રથચરણપાણિઃ શર ઇતિ ।
દિધક્ષોસ્તે કોઽયં ત્રિપુરતૃણમાડમ્બદવિધિર્
વિધેયૈઃ ક્રીડન્ત્યો ન ખલુ પરતંત્રાં પ્રભુધિયઃ ॥ ૧૮ ॥

હરિસ્તે સસ્ત્રં કમલબલિમાધાય પદયોર્
યદેકોને તસ્મિન્ નિજમુદહરન્નેત્રકમલમ્ ।
ગતો ભક્ત્યેદ્રેકઃ પરિણતિમસૌ ચક્રવપુષા
ત્રયણાં રક્ષાયૈ ત્રિપુરહર જાદાર્તિ જગતામ્ ॥ ૧૯ ॥

ક્રતૌ સુપ્તે જગ્રત ત્વમસિ ફલયોગે ક્રતુમતાં
ક્વ કર્મ પ્રધ્વસ્તં ફલતિ પુરુષારાધનમૃતે ।
અતસ્ત્વાં સમ્પ્રેક્ષ્ય કતુષુ ફલદાનપ્રતિભુવં
ઋતૌ શ્રદ્ધાં બદ્ધ્વા ર્દઢપરિકરઃ કર્મસુ જનઃ ॥ ૨૦ ॥

ક્રિયાદક્ષો દક્ષઃ કતુપતિરધીશસ્તુનુભૃતામ્
ઋષીણામાર્ત્વિજ્યં શરણદ સદસ્યાઃ સુરગણાઃ ।
ક્રતુભ્રંશસ્તત્તઃ ક્રતુફલવિધાનવ્યસનિનો
ધ્રુવં કર્તુઃ શ્રદ્ધાવિધુરમભિચારાય હિ મખાઃ ॥ ૨૧ ॥

PORTLAND PANDIT

પ્રજાનાથં નાથ પ્રસભમભિકં સ્વાં દુહિતરં
ગતં રોગિદ્ભૂતાં રિસ્મયિષુમૃષ્યસ્ય વપુષા ।
ધનુષ્પાણેર્યાતં દિવમપિ સપત્રાકૃતમમું
ત્રસન્તં તેડદ્યાપિ ત્યજતિ ન મૃગવ્યાધરભસઃ ।। ૨૨ ।।

સ્વલાવણ્યાશંસા ધૃતધનુષમહ્નાય તૃણવત્
પુરઃ પ્લુષ્ટં દૃષ્ટ્વા પુરમથન પુષ્પાયુધમપિ ।
યદિ સ્ત્રૈણં દેવી યમનિરત દેહાર્ધઘટનાદ્
અવૈતિ ત્વામદડધા બત વરદ મુધ્ધા યુવતયઃ ।। ૨૩ ।।

શ્મશાનેષ્વાક્રીડા સ્મરહર પિશાચાઃ સહચરા
શ્ચિતાભસ્માલેપઃ સ્રગપિ નૃકરોટીપરિકરઃ ।
અમંગલ્યં શીલં તવ ભવતુ નામૈવમખિલં
તથાપિ સ્મર્તુણાં વરદ પરમં મંગલમસિ ।। ૨૪ ।।

મનઃ પ્રત્યક્ ચિત્તે સવિધમવધાયાત્તમરુતઃ
પ્રહૃષ્યદ્રોમાણઃ પ્રમદસલિલોત્સંગિતદૃશઃ ।
યદાલોક્યાહ્લાદં હ્રદ ઇવ નિમજ્યામૃતમયે
દધત્યન્તસ્તત્ત્વં કિમપિ યમિનસ્તત્કિલ ભવાન્ ।। ૨૫ ।।

ત્વમર્કસ્તવં સોમસ્ત્વમસિ પવનસ્તવં હુતવહસ્
ત્વમાપસ્ત્વં વ્યોમ ત્વમુ ધરણિરાત્મા ત્વમિતિ ચ ।
પરિચ્છિન્નામેવં ત્વયિ પરિણતા બિભ્રતુ ગિરં
ન વિધ્નસ્તત્ તત્ત્વં વયમિહ તુ યત્વં ન ભવસિ ।। ૨૬ ।।

ત્રયીં તિસ્ત્રો વૃત્તીસ્ત્રિભુવનમથો ત્રીનપિ સુરાન્
અકારાદ્યૈર્વર્ણૈસ્ત્રિભિરભિદધત્તીર્ણવિકૃતિઃ ।
તુરીયં તે ધામ ધ્વનિભિરવરુન્ધાનમણુભિઃ
સમસ્તં વ્યસ્તં ત્વાં શરણદ ગૃણાત્યોમિતિ પદમ્ ।। ૨૭ ।।

ભવઃ શર્વો રુદ્રઃ પશુપતિરથોગ્રઃ સહમહાં
સ્તથા ભીમેશાનાવિતિ યદભિધાનાષ્ટકમિદમ્ ।
અમુષ્મિન્ પ્રત્યેકં પ્રવિચરતિ દેવ શ્રુતિરપિ
પ્રિયાયાસ્મૈ ધામ્ને પ્રણિહિતનમસ્યોડસ્મિ ભવતે ।। ૨૮ ।।

નમો નેદિષ્ઠાય પ્રયદવ દવિષ્ઠાય ચ નમો

PORTLAND PANDIT

નમઃ ક્ષોદિષ્ઠાય સ્મરહર મહિષ્ઠાય ચ નમઃ ।
નમો વર્ષિષ્ઠાય ત્રિનયન યવિષ્ઠાય ચ નમો
નમઃ સર્વસ્મૈ તે તદિદમિતિ શર્વાય ચ નમઃ ।। ૨૯ ।।

બહલરજસે વિશ્વોત્પત્તૌ ભવાય નમો નમઃ
પ્રબલતમસે તત્સંહારે હરાય નમો નમઃ ।
જનસુખકૃતે સત્ત્વોદ્રિક્તૌ મૃડાય નમો નમઃ
પ્રમહસિ પદે નિસ્ત્રૈગુણ્યે શિવાય નમો નમઃ ।। ૩૦ ।।

કૃશપરિણતિચેતઃ ક્લેશવશ્યં ક્વ ચેદં
ક્વ ચ તવ ગુણસીમોલ્લંઘિની શશ્વદૃદ્ધિઃ ।
ઇતિ ચકિતમમન્દીકૃત્ય માં ભક્તિરાધાદ્
વરદ ચરણયોસ્તે વાક્યપુષ્પોપહારમ્ ।। ૩૧ ।।

અસિતગિરિસમં સ્યાત્કજ્જલં સિન્ધુપાત્રો
સુરતરુવરશાખા લેખની પત્રમુર્વી ।
લિખતિ યદિ ગૃહીત્વા શારદા સર્વકાલં
તદપિ તવ ગુણાનામ્ ઈશ પારં ન યાતિ ।। ૩૨ ।।

અસુરસુરમુનીન્દ્રૈર્ અર્ચિતસ્યેન્દુમૌલેર્
ગ્રથિતગુણમહિમ્નો નિર્ગુણસ્યેશ્વરસ્ય ।
સકલગુણવરિષ્ઠઃ પુષ્પદંતાભિધાનો
રુચિરમલઘુવૃત્તૈઃ સ્તોત્રમેતચ્ચકાર ।। ૩૩ ।।

અહરહરનવદ્યં ધૂર્જટેઃ સ્તોત્રમેતત્
પઠતિ પરમભક્તયા શુદ્ધચિત્તઃ પુમાન્ યઃ ।
સ ભવતિ શિવલોકે રુદ્રતુલ્યસ્તથાઽત્ર
પ્રચુરતરધનાયુઃ પુત્રવાન્કીર્તિમાંશ્ચ ।। ૩૪ ।।

દીક્ષા દાનં તપસ્તીર્થં જ્ઞાનં યાગાદિકાઃ ક્રિયાઃ ।
મહિમ્નસ્તવપાઠસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ।। ૩૫ ।।

આસમાપ્તમિદં સ્તોત્રં પુણ્યં ગન્ધર્વભાષિતમ્ ।
અનૌપમ્યં મનોહારિ શૈવમીશ્વરવર્ણનમ્ ।। ૩૬ ।।

મહેશાન્નાપરો દેવો મહિમ્નો નાપરા સ્તુતિઃ ।

PORTLAND PANDIT

અધોસન્નાપરો મન્ત્રો નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ।। ૩૭ ।।

કુસુાદશનનામા સર્વગન્ધર્વરાજઃ
શિશુશશિધરમૌલેર્ દેવદેવસ્ય દાસઃ ।
સ ખલુ નિજમહિન્મો ભ્રષ્ટ એવાસ્ય રોષાત્
સ્તવનમિદમકાર્ષીર્ દિવ્યદિવ્યં મહિન્મઃ ।। ૩૮ ।।

સુરવરમુનિપૂજ્યં સ્વર્ગમોક્ષૈકહેતું
પઠતિ યદિ મનુષ્યઃ પ્રાંજલિર્નાન્યચેતાઃ ।
વ્રજતિ શિવસમિપં કિન્નરૈઃ સ્તૂયમાનઃ
સ્તવનમિદમમોધં પુષ્પદંતપ્રણીતમ્ ।। ૩૯ ।।

ઇત્યેષા વાઙ્મયી પૂજા શ્રીમચ્છંકરપાદયોઃ ।
અર્પિતા તેન દેવેશઃ પ્રીયતાં મે સદાશિવઃ ।। ૪૦ ।।

તવ તત્ત્વં ન જાનામિ કીર્દશોડસિ મહેશ્વર
યાર્દશોડસિ મહાદેવ તાર્ડશાય નમો નમઃ ।। ૪૧ ।।

એકકાલં દ્વિકાલં વા ત્રિકાલં યઃ પઠેન્નરઃ
સર્વપાપવિનિર્મુક્તઃ શિવલોકે મહીયતે ।। ૪૨ ।।

શ્રીપુષ્પદન્તમુખપંકજનિર્ગતેન
સ્તોત્રેણ કિલ્બિષહરેણ હરપ્રિયેણ ।
કણ્ઠસ્થિતેન પઠિતેન સમાહિતેન
સુપ્રીણિતો ભવતિ ભૂતપતિર્મહેશઃ ।। ૪૩ ।।

ઇતિ શ્રી પુષ્પદંતવિરચિતં શિવમહિમ્નઃસ્તોત્રં સમ્પૂર્ણમ્

યદક્ષરં પદં ભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવ પ્રસીદ પરમેશ્વર ।।

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્ કારુણ્યભાવેન રક્ષ રક્ષ મેશ્વર ।।

PORTLAND PANDIT